भवन्मध्यांराजन्योभवदंत्यांवैश्यस्तिस्रोप्रत्याख्यायिन्यः षड्द्वादशपरमितावामानरं प्रथमामे
के आचार्यायभैक्षंनिवेद्यतिष्ठेद्वाग्यतोहः शेषमित्येके अथब्रह्मचारिधर्माः तदेवाहेति ४३

बतीदं दद्यात्त्विति निबन्धयादिनि बन्ति: अत्र सूत्रानुसारात्पुरुषभिक्षाया एव प्राथम्यमिति केचित् वस्तुत
स्तु यद्यपि सूत्रे पुरुषभिक्षायाः प्राथम्यं प्रतीयते तथापि अप्रत्याख्यायिनीं नारीमप्रत्याख्यायिनं नरं
ब्रह्मादनार्थं विप्रार्थं सुमुखाभ्यामन्वयेन्नदेति पारिजाते आचार्ये लोवश्लोकरूपेण मातृभिक्षाया: प्राथ
अस्मिन्नेव समये भिक्षाचार्यं चरन्ति ॐ भवति भिक्षां देहीति ब्राह्मण: भिक्षां देहि भवति क्षत्रि
य: भिक्षां भवति देहीति वैश्य: इयं भिक्षा मया लब्धा सर्वां भिक्षां गुरवे निवेदयेत् इयं भिक्षाम
या लब्धा इति गुरुर्वदति अथ ब्रह्मचारिणो नियमं वदत्याचार्य: ॥
म्योक्तेर्मातरमेवाग्रे भिक्षेतेति कात्यायनोक्तेश्च तदेकवाक्यतया ब्रीहियववद्बृहद्रथंतरवच्चाविक
ल्परूपेणाविशेषप्रवृत्तस्य सूत्रस्य वाक्यांतरानुरोधेन स्त्रीभिक्षाप्राथम्यपरत्वादन्यथा बृहद्रथंतराव
पिपाठेन बृहदादेर्मुख्यत्वापत्ते मातरमेवाग्रे भिक्षेत पश्चात्पितरं पारिजातप्रयोगरत्ने च मातृभिक्षा
याएव प्राथम्यमुक्तं निर्णयसिंधौ मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां भिक्षेत न भिक्षां प्रथमं या

मंजनं चाक्षिणोः ह पानच्छत्त्रधारणं वर्जयेदिति प्रकृतिं पारिजाते कौर्मे नादर्शं चैव वीक्षेत नाचरे
दं तधावनं गुरूच्छिष्टं भेषजार्थं प्रयुंजन्न कामतः एतन्निषिद्धमध्वादिविषयं अन्यस्य गुरूच्छिष्ट
स्य सर्वप्राप्तिः स चेच्छाधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति वशिष्ठोक्तेः ज्येष्ठभ्रा
तुरिस्यपि ज्ञेयं पितुर्ज्येष्ठस्य च भ्रातुर्यमुच्छिष्टं भोज्यमित्यापस्तंबोक्तेः गुरुपुत्रे तु स्मृत्यर्थसारे उ
क्तं गुरुवद्गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् प्रचेताः तांबूलमभ्यंजनं चैव कांस्यपात्रे च भोजनं
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् अत्र मेखलाजिनदंडोपवीतादि धारणं मनुः यद्यस्य
विहितं चर्म यत्सूत्रं वा च मेखला यो दंडो यश्च वसनं तत्तत्तस्य व्रतेष्वपि तच्छक्षणं प्राग्उक्तं पारि
जाते देवलः उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः स
एव बहूनि चायुष्कामस्य तत्र मंत्रमाह सएव यज्ञोपवीतमिति वाव्याहृत्या वापि धारयेदिति हे
माद्रौ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते देवलः ४४

पूर्वं वेदाध्यायवाचं विसर्जनेध: शय्याक्षारलवणाशीस्याद्दंडधारणमग्निपरिचरणं गुरुसुश्रूषा
भिक्षाचार्यामधुमांसमज्जनोपर्यासनस्त्रीगमनानृताध्नादानानि वर्जयेदिति पारस्कारगृह्योः
तदेवाह तत्रभस्मोशयनं अक्षारलवणाशनं दंडधारणं सर्वदाग्निपरिंचरणं सायंप्रातः
काले गुरुशुश्रूषा च भोजनार्थमनिंद्यब्राह्मणगृहे सायंप्रातःकाले भैक्ष्यं गुर्वानुज्ञया भोज
नविधिना भुंजानः मधुमांसभक्षणं न कुर्यात् तीर्थावगाहनं खट्वाद्युपवेशनं अन्नस्योपरि म
सूरिकाद्युपवेशनं न कुर्यात् स्त्रीणां मध्ये न तिष्ठेत् अनृतं दानानि न वदेत् मिथ्यावाक्यं च न
वदेत् शणमयं वस्त्रं ब्राह्मणस्य अतसीविकारमयं क्षत्रियस्य आविलोममयं वैश्यस्य पला
शदंडो ब्राह्मणस्य बिल्वदंडः क्षत्रियस्य औडुंबरो वैश्यस्य ब्राह्मणस्य केशसंमितं क्षत्रियस्य
ललाटसंमितं वैश्यस्य नासासंमितं इति ब्रतबंधः ॥ ॥९ क्षेः निर्णयसिंधौ याज्ञवल्क्यः म
धुमांसंजनोच्छिष्टं शुक्लं स्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादं च वर्जयेत् मनुः अभ्यंग

ब्रह्मचारी च श्राद्धीयान्नं मधुमांसं तथैव च प्राजापत्यं चरेत् कृच्छ्रं व्रतशेषं समापयेत् पारिजाते प्र
मादाद्यथवा स्वप्ने निसर्गे रेतसो द्विजः व्रती मुच्यति कृच्छ्रेण त्रिरात्रोपोषणेन वा नःशावसूतके स्या
तां मातापित्रोर्मृते ऋते व्रतिनश्चोत्सवा लोकः श्राद्धान्नं न प्रशस्यते संवर्तः मातापित्रोर्विपन्नो तु ब्र
ह्मचार्यपि यः सुतः स व्रतस्थोऽपि कुर्वीत अग्निपिंडोदकक्रियां तेनाशौचं न कर्तव्यं संध्यां चैव न लुप्य
45 ते अग्निकार्यं च कर्तव्यं सायंप्रातश्च नित्यश इति ब्रह्मचारी विपत्तौ तु निर्णयसिंधौ विधानमालायां
येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि तत्कुलं क्षयमाप्नोति सोऽपि दुर्गतिमाप्नुयात् मृतस्य मृतमा
नस्य षडब्दं व्रतमाचरेत् त्रिंशद्भ्यो ब्रह्मचारिभ्यो दद्यात्कौपिनकाभवान् हस्तमात्रा कर्णमात्रा दद्या
त्कृष्णाजिनानि च पादुका छत्रमाल्यानि गोपीचंदनमेव च मणिप्रवालमालाश्च भूषणादि समर्पये
त् एवं कृते विधाने न विघ्नः कोऽपि न जायत इति प्रयोगचिंतामणौ व्यासः ब्राह्मणक्षत्रियविशाश्च रे

युक्षैर्भैक्षामन्वहं सजातीयगृहेष्वेव सार्ववर्णिकमेव वा सार्ववर्णिकमापद्विषयं चानुवर्ण्यं चरे ४५

सावित्र्यादत्वा कृत्वोद्भिः संत्रिनाभिस्तदुक्षिपेत् विधिन्नं चाप्यधीयात भुक्त्वा निर्मितमुत्सृजेत् मनुः
मेखलामजिनं दंडमुपवीतं कमंडलुं अप्सुप्राश्य विनष्टानि गृह्णीतान्यानि मंत्रतः अथेनष्टलोपे म
नुः अकृत्वा भैक्षचरणमसमिध्य च पावकं अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् अनापद्यपा
दित्यागे तु याज्ञवल्क्यः भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः कामावकीर्णमित्याभ्यां जुहुया
दाहुतिद्वयं उपस्थानं ततः कुर्यात्समासिंचंत्वनेन तु मंत्रास्तु मिताक्षरायां ज्ञेयाः स कृत्स्नोपि तु अ
ग्निधाने मानस्तोके जपेन्मंत्रं शान संख्यं शिवाख्यये अग्निकार्यं विना भुंक्ते न पापं ब्रह्मचारिणः स्म
त्यर्थसारे संध्याग्निकार्यलोपे स्नात्वाऽष्टसहस्रं जपः भिक्षालोपे षष्ठशतं तु आभ्यासे द्विगुणं पुनः सं
स्कारश्चेत्युक्तम् अपरार्के संवर्तः यः संध्यां वै न नोपास्ते अग्निकार्यं यथाविधिः गायत्र्यष्टसहस्रं
तु जपेत्स्नात्वा समाहितः अग्निकार्यं संध्याद्वये कार्यं अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपी
ति याज्ञवल्क्योक्तेः सायमेव वा सायमेवाग्निं धीनस्यैके इति कोगाक्षिलोक्तेः पारिजाते शतानपः

द्दोमेनतु हारीतः पुराजगाह वेमत्स्युर्हिंसया ब्रह्मचारिणं अग्निस्तंमोचयामास नस्मात्परिचरेद्धुतं
अत्राभिवादनं तदुक्तं प्राक् स्त्रीसंगमेतु मनुः अवकीर्णीतु कामेन गर्दभेन चतुष्पथे स्थालीपाक
विधानेन यजेद्देनिर्ऋतिं निशि विस्तरस्तु मिताक्षरादौ ज्ञेयः उपवीतनाशे तु हारीतः मनोव्रतपतीभि
श्च तस्य आज्याहुतीर्हुत्वा पुनः प्रतीयात् तत्रैव मरीचिः ब्रह्मसूत्रं विना भुंक्ते विण्मूत्रं कुरुतेथवा गा
यत्र्याष्टसहस्रेण प्राणायामेन शुध्यति ऋग्विधाने तं वोधियोजपेन्मंत्रं लक्षं चैव शिवालये ब्रह्म
चारी स्वधर्मेषु च्युतं चेत्स्मरणमेव तत् इति ब्रह्मचारी धर्माः अथ वेदारंभः तत्राष्टचत्वारिंशद्वर्षा
णि वेदब्रह्मचर्यं चरेद्द्वादश द्वादश प्रतिवेदं यावद्ग्रहणं वेति पारस्कर गृह्योक्तेः मदनपारिजाते वि
शेषः अथ वेदव्रतानि एतान्युदगयन आपूर्यमाणपक्षे प्राजापत्याग्नेयवैश्वदेवसौम्याख्यानि कु
र्यात् प्राजापत्यादिस्वरूपप्रदर्शनमुपलक्षणार्थं अतः स्वस्वशाखाविहितव्रतानि कर्तव्यानि अत्र
कालविशेषमाह गार्ग्यः वेदव्रतानामुदगयनादि काल इति आदिशब्दादापूर्यमाणपक्षाद्युपसं ४६

क्ष्यमन्नाभे कुरुतं द्वेनेति वचनात् तत्रापि शूद्रस्यामान्नमेव पराशरः यस्तु वेदमधीयानः शूद्रान्न
मुपजीवति शूद्रो वेदफलं याति हि द्विजः शूद्रत्वमृच्छति तथा शूद्रान्नेनोदरस्थेन ब्राह्मणो म्रियते यदि
त्रिकालज्ञो वेदवेदी धर्मज्ञश्च षडंगवित् चतुर्वेद्यपि यो विप्रः स प्रेतो जायते नरः इति तथा गुरोः कुले
न भिक्षेत न ज्ञातिकुलबंधुषु अभावे चान्यगेहानां पूर्वं पूर्वं परिवर्जयेत् तथा माधूकरीयं आरण्यब्रा
ह्मणोऽभ्यप्रयच्छति स याति नरकं घोरं भोक्ता भुंजीत किल्बिषं तस्मान्नैवाहरेद्भैक्षमतिरिक्तं कदाचने
ति मनुः भैक्षेण वर्त्तयेन्नित्यमेकान्नाशी भवेद्व्रती भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता न भैक्षं प
रिपाकः स्यान्न भैक्षं च प्रतिग्रहः सोमपानसमं भैक्षं तस्माद्भैक्षेण वर्त्तयेत् हारीतः भैक्षमेवाहितं
पर्यग्निकरणमादित्यदर्शितं गुरवे निवेदितं भैक्ष्यं भवतीति मनुः ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषि
भिः राजन्यवैश्ययोस्त्वेवं नैतत्कर्म प्रचक्षते एतदुपनयनांगाभक्षणातिरिक्तविषयं अग्निकार्ये विशे
षः कारिकायां अग्निकार्यं [illegible] संधानादिव्यमे पर्यूहणे स्यातामादावंते च कर्मणः समिधा

ग्नये स्वाहेति आज्याहुतीर्हुत्वा ब्रह्मणे छंदोभ्य इत्याद्यानवाहुतीर्हुत्वा शेषं समापयेत् यदि यजुर्वेदं त
अथ वेदारंभः तत्राचार्यवरणं ततआचार्यो वेदारंभवेदिसमीपेउपविश्य पूर्ववत्पंचभूसंस्कार एवं
कहरितनामानमग्निंसंस्थाप्य देशकालस्मरणांते अमुकगोत्रोअमुकशर्माहममुकगोत्रस्यामु
कशर्मणः पुत्रस्ययजुर्वेदारंभकर्माहं करिष्ये इतिसंकल्प्य देवताभिध्यानंकुर्यात् वेदारंभक
40 र्मणाहंयक्ष्ये तत्रप्रजापतिमिंद्रमग्निंसोममंतरिक्षंवायुंब्रह्माणंछंदांसिपृथिवीमग्निंब्रह्माणं
छंदांसिदिवंसूर्यंब्रह्माणंछंदांसिदिग्भ्यश्चंद्रमसंब्रह्माणंछंदांसिप्रजापतिंदेवानृषीन् श्रद्धांमेधां
सदसस्पतिमनुमतिमग्निंसूर्यमग्निंवरुणमग्निंवरुणंसवितारंविष्णुंविश्वान्मरुतःस्वर्कान्ब्र
णंप्रजापतिमग्निंस्विष्टकृतंचाज्येनाहंयक्ष्ये ततोब्रह्मोपवेशनादिचरुपर्युक्षणांतंकर्मकुर्यात् त
तोब्रह्मण्वारब्धःस्रुवेणाज्यमादायजुहोति ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐ इंद्रायस्वाहा॰ ४७
इदमिंद्राय ॐ मग्नयेस्वाहा इदमग्नये ॐ सोमायस्वाहा इदंसोमाय अथकलप्रतिष्ठापूजाच ॐ

ग्रहः यथाह सएवपर्वाण्युदगयनआपूर्यमाणपक्षस्यवेदउदगयनइति गौतमोपिगर्भाधानपुंसव
नसीमंतोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडोपनयनंचत्वारिवेदव्रतानीति ब्रा
ह्मणक्षत्रियविशांपंचसांवत्सरिकाणि स्वेदव्रतानिभवंत्याग्नेयंशुक्रियमौपनिषदं शौरभंगोदा
नमितिपारस्कारगृह्योक्तेः ब्रह्मचर्यव्रतकालावधिमाह मदनपारिजाते देवलः अतःपरमष्टच
त्वारिंशद्वार्षिकीवेदव्रतचर्यामातिष्ठेद् शक्तश्चेत् षड्विंशद्वार्षिकीचतुर्विंशतिंद्वादशंवाव्रतिवेद
मिति मनुः षट्त्रिंशदाब्दिकंकार्यंगुरौत्रैविद्यकंव्रतं तदर्द्धिकंपादिकंवाग्रहणांतिकमेववेति अ
स्यार्थः त्रिवेदएवत्रैविद्यं वेदत्रयविषयंब्रह्मचर्यंषट्त्रिंशदाब्दिकंकार्यं प्रतिवेदंद्वादशवर्षाणिब्र
ह्मचर्यंचरेदित्यर्थः आर्द्धिकेषड्वर्षाणि पादिकेत्रीणि एवमुपनीतंतत्कांडोपर्युक्तव्रतधारिणंमाण
वकमध्यापयेत् याज्ञवल्क्यः उपनीयगुरुःशिष्यंमहाव्याहृतिपूर्वकं वेदमध्यापयेद्येनमिति ततो

ब्रह्मोपवेशनादीति तत्रयदाऋग्वेदमारभते तदास्वगृह्योक्तविधिनाग्निप्रतिष्ठाप्यपृथिव्यैस्वाहा अ

हा चंद्रमसे स्वाहेति विशेषः यथोक्तदेवसर्ववेदारंभः यदाज्यभागानंतरं प्रति वेदं पूर्वोक्तप्रधानाहु
तिद्वयं हूयं हुत्वा प्रजापतये स्वाहेति देवेभ्यो ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतये स्वा
हेति सप्ताहुती र्जुहुयात् अनंतरं महाव्याहृतिस्विष्टकृदं नादशाहुती र्हुत्वा शेषं समाप्य यथाविधि
वेदमध्यापयेत्॥ ॥अथ वेदमंत्रपठनमिति तत्र माणवककुक्षयरं परयालं वेदमध्यापयेत् न
स्येवाध्येनव्यनियमान् वशिष्ठः पारं पर्यागतो येषां वेदस्य परिबृंहणः तच्छाखं कर्म कुर्वीत तच्छा
49 खाध्ययनं तथेति स्वशाखाध्ययनानंतरं शाखांतराध्ययनमपि भवति तथा च वशिष्ठः अधीत्य
शाखामात्मीयां पारक्यं चततः पठेदिति अथ वेदाध्ययनं तत्र याज्ञवल्क्यः गुरुं चैवाप्युपासीत स्वा
ध्यायार्थं समाहितः मनुः अध्येष्यमाणस्त्वाचांतो यथाशास्त्रमुदङ्मुखः प्रांजलिब्रह्मकृतोध्याप्यो
मधुवासाजितेन्द्रियः ब्रह्मारंभेवसाने च पादौ ग्राह्यौ गुरोः सदा व्यस्तहस्तपाणिना कार्यमुपसंग्रहणं ४८

गुरोः सव्येन सव्यस्य दक्षिणेन तु दक्षिणः ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा स्रवत्यनों

दंतरिक्षाय वायवेस्वाहा यद्वासामवेदं तद्वादिवेस्वाहासूर्यायस्वाहेति यद्वाथर्ववेदं तद्वादिभ्यःस्वाः
इदंपृथिव्यै ॐमग्नयेस्वाहा इदमग्नये ॐ ब्रह्मणेस्वाहा इदंब्रह्मणे ॐ छंदोभ्यःस्वाहा इदंछंदो
भ्यः अंतरिक्षायस्वाहा इदमंतरिक्षाय वायवेस्वाहा इदंवायवे ब्रह्मणेस्वाहा इदंब्रह्मणे छं
दोभ्यःस्वाहा इदंछं॰ दिवेस्वाहा इदंदि॰ सूर्यायस्वाहा इदछंसू॰ ब्रह्मणेस्वाहा इदंब्र॰ छंदोभ्यः
स्वाहा इदंछं॰ दिग्भ्यःहोस्वाहा इदंदिग्भ्यः चंद्रमसेस्वाहा इदंचं॰ ब्रह्मणेस्वाहा इदंब्र॰ छंदो॰
भ्यःस्वाहा इदंछं॰ ॐप्रजापतयेस्वाहा इदंप्र॰ देवेभ्यःस्वाहा इदंदे॰ ऋषिभ्यःस्वाहा इदंऋ॰ श्रद्धा
येस्वाहा इदंश्र॰ मेधायेस्वाहा इदंमे॰ सदसस्पतयेस्वाहा इदंसद॰ अनुमतयेस्वाहा इदमनुपत
ये ततोभूराद्यास्विष्टकृदंताद्दशाहुतीर्हुत्वा ॐभूःस्वाहा इदमग्नये ॐभुवःस्वाहा इदंवायवे॰ ॐस्वः
स्वाहा इदछं सूर्याय त्वन्नः अपाग्स्वाग्नेयेनेशनं उदुत्तमं इतिपंचाहुतीर्हुत्वा ॐप्रजापतयेस्वाहा॰

इदंप्रजापतये अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते ततः संस्रवं प्राश्यपूर्णपात्रंब्रह्मणेदं

स्तकंदत्वाविद्याभरंभकार्यंरयति पूर्वमोंकारमुच्चार्य ततस्तिस्रोव्याहृतीर्गायत्रीचोच्चार्यपठेद्ब्र
ह्मचारी ऋग्वेदिस्यात्तदा अग्निमीळेतिकंडिकांपाठयेत् ततोग्निमीळइत्यादीन्जपेद्वेदान्स्वश
क्तितइत्याश्वलायनोक्तेः यदा यजुर्वेदीतदाइषेत्वोर्जेत्वेति यदासामवेदी तदाअग्नआयाहीति
यदाअथर्ववेदीतदाशन्नोदेवीरितिकंडिकांपाठयित्वोंकारंव्याहृतीगायत्रीचांतेपाठयेत् क्षत्रि
यवैश्ययोउपनयनंवेदाध्ययनंचपुरोहितशाखायाएवभवति तयोस्तदर्थत्वात् ततआनि
45 राकरणमंत्रंपाठयेत् अथातोधीत्यानिराकरणंतीव्रमेवैलक्षणांजिह्वामेमधुमद्वचनकर्मणा
भूयांभूरिश्रुश्रुवेवात्वाहार्षीः श्रुतंमायिब्रह्मणः वचनमसिब्रह्मणप्रतिष्ठानमसिब्रह्मकोशोसिसनि
रसिशांतिरस्यनिराकरणमासिब्रह्मकोशंमेविशवाचंपयित्वादधामिस्वरकरणकंठोरसंदंस्योष्ठ
ग्रहणधारणोच्चारणशक्तिभवत्वाप्यायंतुमेंगानिवाक्प्राणश्चक्षुः श्रोत्रंयशोबलंजन्मबलंश्रुतम
धीतंतन्मेमनसितिष्ठतुतिष्ठतुइति ततोगुरोःश्यादीसंग्रहसुवर्णादिभागुरोस्संतोषमुत्पादयेदिति ४९

कृतंपूर्वंपरस्ताच्चविशीर्यते प्रांजलिःपर्युपासीनपवित्रैश्चैवयाञ्चितः प्राणायामैस्त्रिभिःपूतस्ततोॐ
कारमर्हति मनुः अध्येष्यमाणश्चगुरुर्नित्यकालमतंद्रितः अधीष्वभोइतिब्रूयाद्विरामोस्त्विति
चारमेत् नोदितोगुरुणानित्यमप्रणोदित एववा कुर्यादध्ययनेयोगमाचार्यस्यहितेषुच मनुः वे
दोपकरणेचैवस्वाध्यायेचैवनित्यके नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि निर्णयसिंधौकौर्मे
अथवेदमंत्रपठनम् ततःप्राङ्मुख आचार्यउदङ्मुखायब्रह्मचारिणेप्रणवपूर्वकंकुलपरं
परयावेदमध्यापयेत् पादोपसंग्रहणंगुरोःगुरुराशिषंदद्यात् ततःगुरवेदक्षिणांदद्या
त् इतिवेदारंभः॥ ॥९ अनध्यायस्तुनांगेषुनेतिहासपुराणयोः नधर्मशास्त्रेष्वन्येषुपर्वा
ण्येतानिवर्जयेत् शौनकः नित्येजपेचकाम्येचक्रतौपारायणेपिच नानध्यायोस्तिवेदानांग्रहणेग्रा
हणेस्मृत इति अथब्रह्मचारीत्वाचमनंविधायाचार्यस्यदक्षिणतः उदङ्मुखःप्रागग्रेषुकुशेषुउ
पविश्यब्रह्मांजलिंकृत्वागुरोःपादौसंगृह्यप्राणायामत्रयंकृत्वानमआचार्यआचारात् हस्तेषुपु

सर्वतोह्वाद्दशांगुलांत्रिमेखलां वेदिं कृत्वा तत्र सपत्रांपलाशशाखां कुशस्तंबं वा तत्र प्रतिष्ठाप्य संपूज्य
सक्तुमिश्रं पापसंसमोदकं निवेद्य पुनरभ्यर्च्य प्रणम्य मेधां मह्यमिति सूक्तं पठेदित्युक्तं प्रयोगचिंता
मणौ इति वेदारंभः अथ समावर्तनं निर्णयसिंधौ वशिष्ठः स्नानमध्याह्नकाले तु होरायां कारयेच्छुभं
होरायां स्नाति भोम होरायां पूर्वाह्ने तदभावे तु कुर्यात्स्नानं यथाविधि सर्वज्ञनेत्रे बृहस्पतिसूत्राद्युदगय
ने दक्षिणायने वा विवाहस्तदा समावर्तनमपि तत्रैव अन्यथोदगयने समावर्तने अनाश्रमी न तिष्ठे
50 नेति विरोधः स्यादित्युक्तं सुदर्शनभाष्ये एतच्च ब्रह्मचारिव्रतलोपप्रायश्चित्तं कृत्वा कार्यं तदायेहवोधा
यनः शौचसंध्यादर्भभिक्षाग्निराहित्यकौपीनोपवीतमेखलादंडाजिनधारिणो दिवास्वापछत्रपादुका
स्रग्धारणोद्वर्तनानुलेपनांजनद्यूतनृत्यगीतवाद्याभिरतो ब्रह्मचारी कृच्छ्रत्रयं चरेन्महाव्याहृतिहो
मं पाक्षिकत्रयोदशाहोमं च कुर्यात् समावर्तनोत्तरं पूर्वमतानां त्रिरात्रमाशौचं कार्यं आदिष्टी नोदकं कु
र्यादान्नतस्य समापनात् समापनोदकं दत्त्वा त्रिरात्रमशुचिर्भवेदिति मनूक्तेः आदिष्टी न ब्रह्मचारीति वि(५०

पद्धतिकाराः एवमाचार्येणाहूत उच्छ्रायप्रतिष्ठया छायानं चेदासीन आसीनं चेत्तिष्ठन्तिष्ठन्तं चेद
भिक्रामन्नभिक्रामं तं चेदभिधावन्तं स एव वर्तमानोऽमुत्राध्यवसत्यमुत्राध्यवसतीति तस्य स्नानक
स्य कीर्तिर्भवतीति पारस्कारगृह्योक्तेः अथ मेधाजननं पारिजाने संग्रहे वेदग्रहणसामर्थ्ययुक्तो मे
अथ समावर्तनम् गोदानकर्म उपसंगृह्य कुमारो वदति आचार्याहं स्नास्ये स्नाहीति वदत्याचा
र्यः ततो गुरोष्पादौ संग्रहणं कुर्यात् तत आचार्यः वेद्यां पंचभूसंस्कारान् कृत्वा राजपुत्रनामान
मग्निं स्थापयेत् ततो देशकालौ स्मरणांते अमुकगोत्रोऽमुकशर्माहं ममुकगोत्रस्यामुकपुत्रस्य
समावर्तनकर्माहं करिष्ये इति संकल्प्य ततो देवताभिध्यानं करोति समावर्तनकर्मणाहं य
क्ष्ये तत्र प्रजापतिमित्यादि वेदारंभकर्मवत् कृत्वा ततोऽन्नप्राशनादि पर्युक्षणानंतरं पात्रा
सादनमुदकुंभाद्यासादः ॥ ॥ ९ धातुजायते येन तन्मेधजननं कर्मोपदिशति स्वयं आश्वलायनः

यासावित्री जगद्धात्री से वमे धारव रूपेण मेधा प्रसीदयत प्रज्याविद्यासिद्धिमभाष्य सनोति स्वगृहे ऐशाने

यज्ञस्योपवेशनादिपरिस्तरणानंतरासदनीयान्यह पवित्रछेदनादीनिनित्यानिविशेषाणिच अग्निका
लत आचार्य अग्नेरुत्तरभागेस्थापितानां दक्षिणोत्तरायतानामष्टानां जलपूर्णकुंभानां पूर्वभागेस्था
पितेषु कुशेषु उदङ्मुखः स्थित्वा येप्स्वंतरग्नयइति प्रजापतिऋषिः आपोदेवतायजुछंदः जलग्रहणे
विनियोगः ॐ येप्स्वंतरग्नयः प्रविष्टा गोह्यउपगोह्यो मयूषो मनोहास्खलो विरुजस्तनुषुरिंद्रियहाता
न्विजहामि योरोचस्तमिह गृह्णामि इतिप्रथमकलशाजलमादायतेनात्मानंमूर्द्धन्यभिषिंचति ते
नेतिप्रजापतिऋषिः आपोदेवतायजुछंदः अभिषेचनेविनियोगः ॐ तेनत्वामभिषिंचयामिश्रिये
५८ यशसेब्रह्मणेब्रह्मवर्चसाय इतिद्वितीयकलशाजलेन येप्स्वंतरग्नयइतिमंत्रेणजलग्रहणं स
र्वत्रापिज्ञेयं अभिषेकमंत्रास्तु पृथक्पृथक् येनश्रियइतिप्रजापतिऋषिः आपोदेवतायजुश्छं
दः अभिषेचनेविनियोगः ॐ येनश्रियमकृणुतां येनावमृशतां सुरां येनक्षावभ्यषिंचतां यद्वांतद
श्विनायशः इतितृतीयकलशाजलेन॥ ॥ यथासुत्रंवा पर्युक्षणार्थमुदकं सामधपात्रिस्तः पुनः ५१

ज्ञानेश्वरः ब्रह्मचर्येयदि कश्चिन्नमनस्तदा त्रिरात्रमध्येविवाहः कार्योन्यथा नेति सिध्यति जनने तु सत्यपि
न त्रिरात्रं तत्रातिक्रांताशौचाभावात् कर्तृत्वेपि वचनाच्चेति दिक् व्यासः अस्मादमप्यधीत्यायोन्यायत
नं च कृत्वा आज्यभागांते ब्रह्मणान्वारब्धः स्रुवेणाज्यमादाय जुहोति ॐ प्रजापतये स्वाहा इदं प्रजाप॰
तये इंद्राय स्वाहा इदमिंद्राय अग्नये स्वाहा इदमग्नये सोमाय स्वाहा इदं सोमाय अथ कल्पश
प्रतिष्ठा पूजा च ततो वेदारंभे या आहुतयस्ताः सर्वा हुत्वा संस्रवं प्राश्य पूर्णपात्रं ब्रह्मणे दद्यात् ततः
स्रुस्रवादानं समिधादानं पुनः स्रुस्रवइत्यादीनां पूर्ववदग्निं पर्युक्ष्याग्नय इति पूर्ववत् ततूयाज्ञ
गन इत्यादि पूर्ववत् त्र्यायुषकरणांतं कर्म कुर्यात्॥ ॥९ स्नुतदर्थवित् सम्यग्व्रतानि संसेव्य समावर्तन
मर्हति याज्ञवल्क्यः गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया इति पूर्णपात्रलक्षणं कर्मप्रदीपे ब्रह्मणे दक्षिणा
देया यत्र या परिकीर्तिता कर्मांतेनूच्यमानापि पूर्णपात्रादिका भवेत् यावता बहुभोक्तुस्तृप्तिः पूर्णेन ९
जायते नावरार्ध्यमतः कुर्यात् पूर्णपात्रमिति स्थितिः रित्यनेन बहुभोक्तृतृप्तिपर्याप्तं पूर्णपात्रमानम अ

चप्रक्षःखंत्रिभिस्तूष्णीमितरैरिति उदुत्तममितिमेखलामुन्मुच्य दंडं निधाय कृष्णाजिनं चोत्तरीयं
येषु स्वं तरग्नयः इति जलग्रहणं आपोहिष्ठेति तिसृणां सिंधुद्वीप ऋषिर्गायत्री छंदः आपो दे
वता अभिषेचने विनियोगः ॐ आपोहिष्ठेति चतुर्थेन येषु स्वं त जलग्रहणं ॐ यो वेति पंचमे
न येषु स्वं तः जलग्रहणं ॐ तस्मा अरं गेति षष्ठकुंभोदकेन येषु स्वं तः जलग्रहणं तूष्णीं सप्तमे
नाभिषिंचति येषु स्वं तः जलग्रहणं तूष्णीमष्टमेनाभिषिच्य ततो भिषेकावशिष्टजलेन सह
स्नधायास्नानं कुर्यात् उदुत्तममिति शुनःशेफ ऋषिर्वरुणो देवता शार्करी छंदः पाशान्मो
52 केविनियोगः ॐ उदुत्तममितिमंत्रेण मेखलां शिरोमार्गेण निस्सार्य भूमौ दंडं निधाय कृ
ष्णाजिनं चोत्तरीयं वासोन्यत्परिधायादित्यमुपतिष्ठेत् उद्यन्निति प्रजापतिऋषिः आदित्यो
देवता शार्करी छंदः सूर्योपस्थाने विनियोगः ॥ ॥९ वासोन्यत्परिधायादित्यमुपतिष्ठेत उद्य
न्भ्राजजिष्णुरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं माकुर्याविदन्मागम ५२

सुम्नवाः पंचपुनः पर्युक्षणार्थंवारि हरितः कुशाः अष्टौहे मराजततांम्नमृण्मयादि वारिपूर्णाः सर्वौ
षधिदर्भस्वर्णयुताः उदकुंभाः हेमराजतनताम्नाश्वमृण्मयाव्क्षणान्विताः पात्रीद्राहप्रतिष्ठादौकुंभाः
स्युरभिषेचनेतिविष्णुधर्मोदासेहलवचनादग्नेरुत्तरतः उदकंसस्थाः सूर्योपस्थानार्थंवस्त्रं दधिस्ति
लावाभक्षणार्थंवपनार्थंनापितः स्नानार्थंवारि औदुंबरदंतधावनं उद्वर्तनं चंदनं अहतेवाससी
यज्ञोपवीतंम् पुष्पमाला शिरोवेष्टनार्थमुष्णीषं कर्णवेष्टकौ अभूषणानिवा अंजनं दर्पणं नूतन
छत्रं उपानहौ पादुकौच वैणवदंडं कमंडलुंचेत्यासाधरोषंप्रकृतिवद्याज्ञिकस्योपसंगृह्यगुरुंश्वस
मिधोभ्याधायपरिश्रितस्योत्तरतः कुशेषुप्रागग्रेषुपुरस्तान्स्थितानामष्टानामुदकुंभानांयेप्स्वंत
रग्नयः प्रविष्टाग्रोपगोह्योमयूखोमनोहास्खलुविरुजुस्तनुषुरिंद्रियहानान्विज्ञहामियोरोचनस्तमि
हगृह्णामीत्येकस्मादपोगृहीत्वातेनाभिषिंचतितेनमामभिषिंचामिश्रियेयशसेब्रह्मणेब्रह्मवर्च
सायेतियेनश्रियमकृणुतांयेनावमृशतांसुरांयेनाक्षावभ्यषिंचतांयद्वांतदश्विनायशइस्माहुति

योयन्भ्राजभृष्टिरिंद्रोमरुद्भिरस्थात्सायंयावह्निरस्थात्सहस्रशानिंमाकुर्वाविद्वान्नागमयेतिपार-
पयेत् ततः पाणिप्रक्षाल्यततदवनेजनंदक्षिणस्यांदिशिनिषिंचेत् पितर इतिप्रजापत्यग्निर्विसर-
स्वनीद्गाक्रऋषयःपितरोदेवतादक्षिणाद्दिशिनिषिंचनेविनियोगः ॐपितरःशुंधध्वमिति ततः
आचमनंकृत्वा अनुलेपनरेणतिलकादिरूपेणानुलिप्यजपेत् ॐसुचक्षाइतिप्रजापतिऋषिः
सुचक्षादेवतायजुश्छंदः जपेविनियोगः ॐसुचाहमक्षिभ्यांभूयासंसुवर्चामुखेनसुश्रुत्क-
र्णाभ्यांभूयासं ततः अहतंवासः परिधत्ते परिधास्यइत्याथर्वणऋषिःवासोदेवतापंक्तिःछं-
दःवासःपरिधानेविनियोगः ॐपरिधास्येयशोधास्येदीर्घायुत्वाय रदृष्टिरस्मिःशतंचजीवा-
मिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये ततःयज्ञोपवीतधारणं यज्ञोपवीतमितिमंत्रेण
द्विराचमनमथोत्तरीयं॥ ॥८ स्कारगृह्योक्तेः आश्वलायनःमेखलामजिनंदंडंवस्त्रंयज्ञोपवी-
तकं एकैकंधारयेत्तत्रक्रमेणैवयथामथा आचार्यायचनेद्द्याद्दासंतीब्रह्मचार्यथ नवंचैवात्र ५३

योद्यन्भ्राजरिष्णुरिं द्रोमरुद्भिरस्थाद्दिवायावद्भिरस्थाछनिरसिशानसनिंमाकुर्वीविदन्माआगम
डोमुद्यन्भ्राजजिष्णुरिं द्रोमरुद्भिरस्थात् प्रातर्यावभिरस्थाद्दशसनिरसिदशसनिमाकुर्वीविद
न्माआगमयो द्यन्भ्राजरिष्णुरिं द्रोमरुद्भिरस्थात् दिवायावभिरस्थाछनशानिरसिशतशानिंमाकु
र्वीविदन्माआगमयोद्यन्भ्राजभृष्णुरिं द्रोमरुद्भिरस्थात् सायंयावभिरस्थात्सहस्रशानिरसिसह
स्रशनिंमाकुर्वीविदन्माआगमय इति सूर्योपस्थानमंत्रः ततः दधितल्लान्माश्याचम्य जटिलो
मनखानिवापयित्वा औदुंबरकाष्ठेन दंतधावनं कुर्यात् अन्नाद्यायेत्यायर्वेलाऋषिः सोमो
देवता अनुष्टुप् छंदः दंतधावने विनियोगः ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागतः स
मे मुखं प्रसार्क्ष्यते यशसा भगेन च ततः सुगंधिद्रव्येनोद्वर्तनं कृत्वा शीतोष्णोदकेन स्नात्वा
चंदनानुलेपनं कुर्यात् प्राणापान इति प्रजापतिऋषिः प्राणापानौ देवता यजुश्छंदः चंदना

नुलेपने विनियोगः ॐ प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पय इत्यनेनानुलेपनं प्रा

तेयद्यशोप्सरसमिंद्रश्चकार विपुलंपृथुस्तेनसंग्रथिताःसुमनस आबध्नामियशोमयीत्युष्णीषे
यशसामित्यार्वणऋषिःलिंगोक्तादेवतात्रिष्टुप्छंदः उत्तरीयपरिधानेविनियोगः ॐयशसामा
द्यावापृथिवीयशसेंद्रावृहस्पतीयशोभगश्चमाविंदद्यशोमाप्रतिपद्यतां ततः आचमनंवि
धायपुष्पमालांगृह्णीयात् या आहरदिति हृयोर्भरद्वाजऋषिःसुमनोदेवताप्रथमायाग्रह
णेद्वितीयायाधारणेविनियोगः ॐयाआहरज्जमदग्निःश्रद्धायैकामायेंद्रियायताअहंप्रति
गृह्णामि यशसाचभगेनचगृहीत्वाबध्नाति यद्यशोप्सरसमिंद्रश्चकारविपुलंपृथुस्तेन
संग्रथिताःसुमनसआबध्नामियशोमयीति अथोष्णीषेणशिरोवेष्टयेत् ॐयुवासुवासाइ
तिविश्वामित्रऋषिःसूर्योदेवतायजुश्छंदः शिरोवेष्टनेविनियोगः ॐयुवासुवासुवासापरि
वीत आगात्सुश्रेयान्भवतिजायमानस्तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतः ततः
अन्यान्यपिवाससीत् धीपारि धार्यकर्णवेष्टकौकर्णयोपरि धत्ते ॥ युग्मापिसमवेष्टयनेयुवासु

कौपीनं धारयेत्तु नरे वहि विप्रेभ्यः कलशान्दद्यादूह्लीयाद्वा शिखो वटुरिति कारिकायां अभक्ष्यभ
क्षणात्पापं वा लेन्चैव तु यत्कृतं तत्पापस्य विमुक्त्यर्थं प्राशयेद्दधि वा तिलान् दधितिलान्वा प्राश्य जटा
लोमनखान् सछंहृ ध्यौ दुं वरेण दंतान् धावितान्नाद्याय व्यूह ध्व छंसोमो राजायमागमत् स मे मु
खं प्रमार्क्ष्यते यत्रा सा भगेनन्चेत्तुत्साद्यपुनः स्नात्वानुलेपनं नासिकयोर्मुखस्य चोपगृह्लीत प्राणापा
नौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति पितरः शुंधध्वमिति पाण्योरवनेजनं दक्षिणानिषिं-
च्यानुलिप्य जपेत्तु चक्षा अहमाक्षिभ्यां भूयासं सुवर्चो मुखेन सुश्रुत्कर्णाभ्यां भूयासमित्यहतं
वासो धौतं धौत्रेणाच्छादयीत परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि शतं जीवामि शरदः
पुरूचीरायस्पोषमभिसंव्ययिष्य इत्यथोत्तरीयं यशसा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती यशो
भगश्च माविदद्यशो मा प्रतिपद्यतामित्येकं चेत्पूर्वस्योत्तरवर्गेणाच्छादयीतेति पारस्कारगृह्योक्तेः
या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेनन्चेत्यथा वभ्री

रञ्चार्योभवत्सङ्गिरुद्राहृतः यःस्यात्पुरोहितोब्रह्माहोताचसहियाज्ञकाःउल्कावेदमधीयत्रय॰
दक्षिणकर्णे अलंकरणमसि भूयोलंकरणंभूयादिति वामकर्णे अंजनंवृत्रस्येति प्रजापति
ऋषिःअंजनंदेवतायजुश्छंदश्चक्षुषोअंजनेविनियोगः ॐवृत्रस्यासि कनीनकश्चक्षुर्दा असि
चक्षुर्मेदेहीति ततआदर्शंरोचिष्णुरसीतिरोचिष्णुऋषिः आदर्शोदेवतायजुश्छंदः आदर्शावेक्ष
णेविनियोगः ॐरोचिष्णुरसीतिमंत्रेणात्मानमादर्शेत् ततःछत्रं बृहस्पतेरितिगौतमऋषिःछ
त्रोदेवताबृहद्गायत्रीछंदः छत्रग्रहणेविनियोगः ॐबृहस्पतेश्छदिरसिपाप्मानोमामंत॰
र्द्धेहीति ततोपानहौगृहीत्वायुगपत्पादयोःप्रतिमुंचते प्रतिष्ठेस्थइतिप्रजापतिऋषिरु॰
पानेनागिरोदेवतायजुश्छंदः उपानहोपरिधानेविनियोगः ॐप्रतिष्ठेस्थोविश्वतोमायातमि॰
त्युपानहौप्रतिमुंच्यतस्मीपादुकांपरिधत्ते ततोवैणवंदंडमाधत्ते विश्वाभ्यइतियाज्ञवल्क्य
ऋषिर्दण्डोदेवतायजुश्छंदः दण्डग्रहणेविनियोगः॥ [illegible]स्यादिति [illegible]पिता तदाचार्यपदं ५५

वासायित्स्यलंकरणमासिभ्रयोलंकरणंभ्रयादिनिकर्णवेष्टकौवस्त्रस्येत्यक्षिणीरोचिष्णुरसीत्यात्मा
नमादर्शेनप्रचक्षते छत्रंप्रतिगृह्णातिबृहस्पतेश्छदिपाप्मनोमामंतर्द्धेहीतिपारस्कारगृह्योक्तेः
स्नातकव्रतान्याह मनुः उप्तकेशनखश्मश्रुर्दांतः शुक्लांबरः शुचिः स्वाध्यायेनिसयुक्तः स्यान्नित्य
मात्महितेषुचवैणवींधारयेद्यष्टिंसोदकंचकमंडलुं सोदककमंडलुंकस्रौनधार्यं यज्ञोपवीत
वेदंचशुभेरौक्मेचकुंडले वेदमुष्टिमिताःकुशाः निर्णयसिंधौ व्यसः यज्ञोपवीतद्वितयंसोदकं
चकमंडलुं छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ मनुः उपानहौचवासश्चधृतमन्यैर्नधार
येत् उपवीतमलंकारमजंकरकमेवचेति आन्यान्यपिबहूनिगृह्यसूत्रादिभ्योज्ञेयानि प्रति
ष्ठेस्थोविश्वतोमायांतमित्युपानहौप्रतिमुंचतेविश्वाभ्योमानाष्ट्राभ्यस्परिपाहिसर्वतइतिवैणवं
दंडमादत्ते दंतप्रक्षालनादीनिनित्यमपिवासः छत्रोपानहश्चापूर्वाणिचेन्मंत्रइतिपारस्कारगृ
ह्योक्तेः संस्कारेषुच [illegible] दक्षिणादानं आश्वलायनः पितैवगुरु

कमभिषिंच्यतिलकंकृत्वानियमान्श्रावयेत् अथस्नातकस्यनियमान्वक्ष्यामः तत्रत्रयःस्नातकाभ
वंति विद्यास्नातकोव्रतस्नातकोव्रतस्नातकोविद्याव्रतस्नातकाइति समाप्यवेदमसमाप्यव्रतंयःसमावर्त्तते
सविद्यास्नातकः समाप्यव्रतमसमाप्यवेदं यः समावर्त्ततेसव्रतस्नातकउभयंसमाप्ययः समावर्त
56 तेसविद्याव्रतस्नातकइतिरपारस्कारगृह्योक्तेः अथशिक्षातद्यथा कामादितरोगीनृत्यवादित्रा
णिनकुर्यात् तस्यार्थः कामादिच्छयाइतरईत्यीताद्न्योनभवेत् तथेवेक्षनेनृत्यगीतवादित्राणि
नकुर्यात् नतत्रगच्छेत् तस्यादौप्रवृत्तानन्यान्द्रष्टुंनगच्छेत् इतरोब्रह्मचारीसोपिनकुर्यान्नगच्छे
दित्यर्थः इच्छयागाथेतश्शृणुयात् तथाश्वमेधे दिवाब्रह्मणोगायतीतियजमानंश्रावयतिन्वेति
गानेश्रवणेवाधिकारः एवमन्यत्रापियत्रविशेषविधिरस्तितत्रैवाधिकारोनान्यत्रेत्यर्थः कामंतु
गीतंगायंतिदेवगीतिनारमतइतिश्रुतेः क्षेमेनक्तंग्रामांतरंनगच्छेत् क्षेमेराजादिभयराहित्येस
तिनक्तं रात्रौग्रामांतरं अन्यंग्रामंनगच्छेत् नचधावेत् क्षेमसतिनधावेदित्यन्वयः अथवाक्षेमे ५६

नस्यजायतेब्रह्मरोपिहि पितामातातथाचार्यस्त्रयोमान्याःसदैवहि अन्येपिश्रोत्रियोवृद्धोवेदवि१
द्याप्रदास्तथा दद्याद्विभवसारेणकर्मांगत्वेनदक्षिणां वसुर्णवर धान्यादिसद्योनंतफलंलभेत् वर
मभिलखितं नददातिद्विजोहोत्रेलोभाद्यज्ञांगदक्षिणां विनेसतिकृतेकर्मनिष्फलंस्याद्धुन क्षयं ध
ॐविश्वाभ्योमानाव्द्वाभ्यस्यारिपाहि सर्वनइ तिमंत्रेणवैणदंडंगृहीत्वालक्ष्मीकमंडलुंगृह्णी
यात् ततः दक्षिणादानम् अभिषेकं तिलकंविप्राशीर्ग्रहणं ब्राह्मणभोजनंचेतिशिवम्॥ ॥
तिनोयंनिषेधः स्याद्धुनहीनस्यचक्कचित् असमर्थोनमेतसद्योदत्वाक्षतफलादिकं विप्रेभ्योदक्षिणांद
त्वागृह्णीयादाशिषःस्वयं यथाविभवसारेणहेनवेयज्ञदक्षिणां आसायंनैवकिंचित्स्याद्हैसकंकर्म
चैवहीति ब्राह्मणभोजनसंख्यामाह हेमाद्रौयज्ञपार्श्वः शतंविवाहसंस्कारेपंचाशन्मेखलाविधा
विति अभिषिंचेत्स्त्रियंदानंविनीतंदत्तदक्षिणमिति वचनाद्दक्षिणादानानंतरं विनायककलशाज्जमा
दायाचार्यःपावमानीभिः ऋग्भिःयास्तोमिश्चयोराप्रसमं न्ते सुरास्त्वामभिषिंचंत्वित्यादिकैःस्नान

ह नदीलमंत्रंपठेत् छत्रीसुयष्टिपाणिस्तुचरेद्यात्रौ नथादिवा नच्छायाशब्दविन्रस्तोप्रशाम्यनिहिप
न्नगाः॥ ॥अप्सुआत्मानंनावेक्षेत् जलेषुप्रतिबिंबआत्मानंनपश्येत् अजातलोम्नींविपुंस्कांषंढंचनो
पहसेत् भ्रूनेत्रादिस्थानेरोमरहितांपुंव्यंजनवतींश्मश्र्वादियुतांस्त्रियंषंढंनपुंसकंचनहसेत् न
गर्भेत् गुर्विणीविजन्येतिब्रूयात् षण्मासोपरिगुर्विणीगच्छेत् तामेवविजन्येतिब्रूयात् सकुश
मितिनकुर्थं भगालमितिकपालं मणिधनुरिंद्रधनुंचब्रूयात् परस्यगांवत्संवापाययतींनाच
क्षीत् स्वामिने गौतमशंखलिखितौ नपरक्षेत्रचरंतींपाययंतींवा अन्यस्मिन्कथयेत् गोष्ठे
पाययंतींवत्सइत्यपिउर्वरायामनंतर्हितायामभ्रयावुत्सर्पन्तिष्ठन्मूत्रपुरीषेनकुर्यात् उर्वरा
यांसर्वसस्याढ्यायां अनंतर्हितायां काष्टपत्रलोष्टादिनाछादितायांभूमौमूत्रपुरीषंचनकुर्या
त् उत्सर्पन्गच्छन् तिष्ठन् एतेनकुर्यात् स्वयंप्रशीर्णेन काष्ठेन गुदंप्रमृज्जीत स्वयंत्रुटितेन अ
पज्ञीयेनकाष्ठेनगुदंप्रमार्जनंकुर्यात् विकर्णंवाससानाछादयीत स्मृतिशिष्टाचाराभ्यांविरुद्धं ५७

सतिपदभावेनचधावेदित्यर्थः कूपावेक्षणं कुर्यात् कौतुकादिना कूपाद्यवेक्षणं न कुर्यात् वृक्षारो
हणं फलअपतनं न कुर्यात् वृक्षाग्रोपरि गमनेन वृक्षफलत्रोटनं न कुर्यात् संधिसर्पणं न कुर्यात् सं
धिसर्पणं संधिभ्रमिगमं अथवा संध्यायामपमार्गगमनं अथवा संधिकुजीर्णद्वारं नेनानिविद्य
सर्पणं प्रवेशः यद्वा संध्यासु संध्यामनुपास्य देशांतरगमनं यद्वा संधिमित्रदंपतीपितृपुत्रभ्रा
तॄणामेकांतत्रगमनं भेदमध्यप्रवृत्तिः विवृतस्नानं कुर्यात् विवृतस्नानं नग्नस्नानं यद्वा विवृतेव५
र्मा क्षेत्रस्नानं विषमलंघनं न कुर्यात् विषमगर्तादि यद्वा वक्रभ्रमौउत्कुत्सकरणं पर्वतादिलंघनं शु
ष्कवचनं न कुर्यात् लज्जाकरं दुःखकरममंगलभाषणं वारं वारमेतत्त्रिविधं श्लीलं निष्ठुरभाषणं
च संध्यादित्यप्रेक्षणं त्रिसंध्यास्वादित्यावलोकनं अथवा राहुणाग्रस्तं वारिस्थं वासमानिरोहितं न
मादर्शजलाद्यपगतं रक्तवर्णं नेक्षेत् भक्षणं सिद्धान्नपावनं एतानि क्षेमे सति न कुर्यात् नहवेस्ना५
ना भिक्षेत् अपह वेस्नाना भिक्षां जपांनानि शुभः वर्षत्यप्रावृतो गच्छेत् अजेद यमेवज्ञः पाप्मानमप

एवेदमंत्रेणचवर्हिशाखातअभ्यंतरेगत्वाजीवंतीनांपूजनंदक्षिणादानानंतरंविधायब्राह्मणान्
भोजयित्वाइष्टैःसहस्वयंभुंजीत इतिश्रीमद्दीक्षितमुकुंदलालस्यात्मजअडालूलालदीक्षितस्य
सूनुदीक्षितशिवानंदविरचितेउपनयनचिंतामणौसमुहूर्तनिर्णयोपनयनवेदारंभसमावर्त
ननामप्रथमःप्रकाशः १ अथपुनरुपनयने प्रयोगचिंतामणौ एतच्चैकं वेदमधीत्यवेदांतरा
ध्ययने अज्ञानाद्विट्लशुनगृंजनादिभक्षणेनिषिद्धलशुनादिभक्षणेप्रतिषिद्धदेशगमनादौचभव
ति इदंचग्रामाद्बहिःप्राच्यामुदीच्यांवायत्रग्राम्यपशुशब्दोनश्रूयतेतत्रकार्यमितिमदनरत्ने
स्पष्टं निर्णयसिंधौ पारिजाते शातातपः पशुनंगृंजनंजग्ध्वापलांडुंचतथाशुभं उष्ट्रमानुष
केभास्वरराशभीक्षीरभोजनात् उपायनंपुनःकुर्यात्तप्तकृच्छ्रंचरेन्मुहुरिति हेमाद्रौवृद्धमनुः
जीवन्यदिसमागच्छेत् घृतकुंभेनिमज्ज्यच उद्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत् तत्रैव
पाद्मे प्रेतशय्याप्रतिग्राहीपुनःसंस्कारमर्हति हेमाद्रौ [illegible] गौतमः खरमुष्ट्रंचम ५९

वासोन परिधीत मंजिष्ठादिरक्तं नीलाद्यरक्तं वा न परिदधीत दृढव्रतो वधत्रस्यात्सर्वत आत्मानं
गोपायेत् सर्वेषां मित्रमिव भूयात् इति साधारणनियमाः अथ समावर्तनानंतरं त्रिरात्रनियमा
कथ्यंते अमा छं शाशी स्यात् मांसवर्जितं भक्षेत् मृण्मयपायी मृत्पात्रेण जलपानं कुर्यात् स्त्री
शूद्रशवकृष्णशकुनीशुनां चादर्शनं भावादिना स्त्रीदर्शन स्त्रीशूद्रशवकृष्णशकुनीशुनां वादर्श
नं न कुर्यात् मूत्रपुरीषष्ठीवनं चातपे न कुर्यात् मूत्रपुरीषष्ठीवनं च धर्मे न कुर्यात् सूर्यात्मानं ना
न्तर्दधीत छत्रादिना सूर्यात्मानं नाच्छादयीत तप्तोनोदकार्थी न कुर्वीत अर्थात् जलार्थात् शौचा
दीन् तप्तोदकेन कुर्यात् अवज्योतिरात्रौ भोजनं कुर्यात् दीपादिना प्रज्वाल्य रात्रौ भोजनं कुर्यात्
सत्यवचनमेव मर्यादां वप्यन्तं वदेत् एवं शिक्षयित्वा आचार्यः गुर्वाद्यभिवादनार्थमनुज्ञां दत्वा
यथासुखं विहरेत् ततः स्नातकः गुर्वाभिवाद्य वादनंतरं गुर्वादिभ्यो गोहे मव स्नानादिना यथायो
ग्य दक्षयित्वा अन्येभ्यो ब्राह्मणेभ्यो दीनानाथादिभ्यश्च यथाशक्ति संपाद्य गीतमंगलघोषे

गच्छन्पुनः संस्कारमर्हति प्रयोगपारिजाते शिखां छिंदंति ये मोहाद्वेषादज्ञानतोपि वा पुनः संस्कारमर्हति त्रयो वर्णा द्विजातय इति संग्रहे भविष्ये अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति हेमाद्रौ तथोभयमुखी घोरां कांचनीं मेदिनीं द्विजः अत्र पुनरुपनयनं तथा कर्मनाशाजलस्पर्शात्क रतोयाविलंघनात् गंडकी बाहुतरणात्पुनः पुनः संस्कारमर्हति ताराचंद्रानुकूलेष्वपि ग्रहाद्येषु शुभेष्वपि पुनर्वसौ छन्नो विप्रः पुनः संस्कारमर्हति तथा विनर्तुना वसंतेन कृष्णपक्षे गर्भग्रहे अ पराह्णे चोपनीतः पुनः संस्कारमर्हति वशिष्ठः पापांशकगते चंद्रे अरिनीचस्थितेपि वा अनध्या ये चोपनीतः पुनः संस्कारमर्हति अनध्यायाः नित्यनैमित्तिकाः सर्वेपि पराशरः रेतोमूत्रकर निर्मथित दधि वह्निर्वैदपुरोडाशानामत्यंताभ्यासे कृच्छ्रः पुनरुपनयनं चेति तथा ब्रह्मचारिणः मातापितृगुर्वाचार्यव्यतिरिक्तानामंत्यकर्मकरणे पुनरुपनयनमित्यपरार्कादयः कारिका यां वेदांतरमधीत्यैव स्ववेदं यस्त्वधीयते उपनीतिमिच्छंत्यथामंत्रं कर्मवर्जिता यद्वैनदुपनीत ५९

ह्रिषमनड्वाह मजं तथा यस्तु मारुह्य मुखजः कोशे चांद्रं विनिर्दिशेत् मार्कंडेयः खरमारुह्य विप्र
स्तु योजनं यदि गच्छति तप्तकृच्छ्रत्रयं प्रोक्तं शरीरस्य विशोधनं पुनर्जन्म प्रकुर्वीत घृतगर्भे वि
धानतः मदनरत्ने मिताक्षरायां च स्नानमात्रमुक्तं मनुः अज्ञात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव
च पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः मिताक्षरायां पराशरः यः प्रत्यवसितो विप्रः प्रव्रज्या
तो विनिर्गतः अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति स चरेत्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि
च जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् बौधायनसूत्रे अथोपनीतस्याव्रात्यानिना
न्योच्छिष्टं भुंजीतान्यत्र पितृज्येष्ठाभ्यां नास्त्रिया सह भुंजीत मधुमांससूतकान्नानि दशाह संवे
पिनी क्षीरं छत्राकनिर्यासो विल्वपनं गणान्नगणिकान्नमित्येतेषु पुनः संस्कारं प्रतिषिद्धदेशा
गमनमित्येके षामथाप्युदाहरंति सुराष्ट्रं सिंधुसौवीरमवंतीं दक्षिणापथं एतानि ब्राह्मणो ग
त्वा पुनः संस्कारमर्हति तथा [illegible] अंगवंगकलिंगेषु सौराष्ट्रे मागधेषु च तीर्थयात्रां विना

षोयंसमानमितरद्भवेदितिकारिकोक्तेरत्रापिनांदीश्राद्धादिभवतिइत्याहुः निर्णयसिंधौ पराशरः अ
जिनंमेखलादंडं भैक्षचर्याव्रतानिच निवर्तंतेद्विजातीनांपुनःसंस्कारकर्मणि बोधायनसूत्रे अथ
पुनःसंस्कारं व्याख्यास्यामोदेवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वापालाशीःसमिधमाज्येनवाभ्या
धायवाचयति पुनस्त्वादित्या कामाःस्वाहेत्यथाव्रात्यप्रायश्चित्तेजुहोति यन्मआत्मनोभिंदाभूत्पुन
60 रग्निश्चक्षुरदादितिद्वाभ्यां अपक्वाजुहोति सप्ततेअग्ने घृतेनस्वाहेत्यथाज्याहुतीरुपजुहोतियेनदे
वाःपवित्रेणेतितिसृभिरनुष्टुप्छंदसंस्विष्टकृत्प्रभृतिसिद्धमधिनुवरप्रदानात् अथापरमापरि
धानात् कृत्वापालाशीःसमिधमाधायाव्रात्यप्रायश्चित्तेजुहोति अथव्याहृतीर्जुहोति अथापरोब्रा
60 ह्मणवचनादेवंसांविच्याशतकृत्वो घृतमभिमंत्र्यप्राश्यकृतप्रायश्चित्तोभवति गुरोर्वापुच्छिष्टं
भुंजीत अथाप्युदाहरंतिवपनंदक्षिणादानमममेखलांदंडमाजिनंभैक्षचर्याव्रतानिच निवर्तन्तेपु
नःसंस्कारकर्मणिस्येतेनपुनःसंस्कारव्याख्यामाःइति अथपुनरुपनयनप्रयोगः तत्रकर्त्ताशुभदिने ६९

स्यप्रायश्चित्तं यदा भवेत् कृताकृतं च पवनं मेधाजननमेव च मेधाजननसंज्ञा वेव्रतचर्या भवेदि
ह अनुप्रवचनीयश्च न द भावेद्धयं न हि परिदानं तु कार्यं स्यान्निमित्तानंतरं त्विदं पूर्वस्यावाचयेत्
स्थानेन तत्सवितुर्वृणीमहे भणितोत्र विशेषोयं समानमितरद्भवेत् तेन मेधाजननस्य पक्षाश्रय
णेव्रह्मौदनः त्रिरात्रादिव्रतानि च भवंति अन्यथा न प्रतिवेदमुपनयनं च न तत्तद्वेदशाखायाका
र्यमिति न्यायसुधाकरः अन्ये तु सर्वेभ्यो वेदेभ्यो सावित्र्यनूच्यत इत्यापस्तंबवचनात्रिभ्य एव
तु वेदेभ्यः पादं पादमद्धं दुह्यदिति वचनांतराच्च प्रतिवेदनोपनयनमित्याहुः अथर्ववेदार्थं तु पुन
रुपनयनं भवत्येव नान्यत्रे संस्कृतोभृग्वंगिर समधीयीतेति श्रुतेः भृग्वंगिरसमाथर्वणं अस्मि
श्च पुनरुपनयने निमित्तानंतरं त्विदमिति कारिकावचनान्निमित्तानंतरं क्रियमाण एव कालनि
यमः निमित्तानंतर्याभावे तु जातेष्टिवत्स्वकाल एवान्तरायणाद्दोनस्य कर्मव्यनेति अस्य प्रायश्चि
त्तार्थत्वेन नांदीश्राद्धाभावः प्रायश्चित्तांतरे नांदीश्राद्धप्रदर्शनात् केचित्तु भणितोत्र विशे ६

तस्योत्तानंसांगुष्ठंगृहीत्वापुनर्वक्षार्थंसवितानेहस्तंगृहीत्वापुनर्वक्षार्थं अग्निराचार्यस्तवामुक
शर्मन्निति हस्तंगृहीत्वा आदित्यमीक्षयेत् देवसवितरेषतेब्रह्मचारी तंगोपायसमामृतेति अ
त्रकस्येति मंत्रो न भवति परिदानवर्जमित्युक्तेः ततः युवासुवासा इत्यर्द्धर्चेन वटुं प्रदक्षिणमा
वर्त्य तंधीरास इति तस्यांसयोरुपरि स्वस्य पाणीगमयित्वा पाणिभ्यां तद्धृदयं स्पृष्ट्वा दक्षिणे
गत्वा अग्नये समिधमित्यनेन समिधमादध्यात् अग्नय इदं बौधायनसूत्रे तु पालाशीं समिधं
घृतेनाभ्यज्य पुनस्त्वादित्या कामाः स्वाहेति जुहोत्यथाव्रात्यप्रायश्चित्तेन जुहोति जन्म आत्मनो
मिंद्राभूत्पुनरग्निश्चक्षुरातिद्धितिहाभ्यां सपक्षाज्जुहोति सप्तते अग्ने घृतेन स्वाहेत्यथाज्याहुती रुपजु
होति येन देवा पवित्रेणेति तिसृभिर्जुहोतीत्युक्तं एवं होमं कृत्वा तेजसामासमनज्मीति मुखं त्रिर्निमृज्य
मपि मे धामिति षड्भिरुपस्थायमानस्तोक इति त्रिभूतिं धृत्वा ओजस्वम इत्युपस्थाय करौ धृत्वामु ६१
कशर्मा अहं भो ज अग्निमभिवादये इत्यग्निं नमस्कुर्यात् ततः अग्नेपश्चिमगः उत्तरतो वा प्रत्यङ्मुखः

चंद्रतारादनुकूलेष्वाभाहृहिः प्राच्यामुदीच्यां वापत्रग्रान्यपमुशब्देनम्भयतेनतत्रगत्वाम्रुच्चिभमौ
गोमयोदकेनोपलिप्तप्रदेशे प्राङ्मुखोपविश्याचम्यमातृपूर्वकनांदीश्राद्धं विधाय आचार्यं वृणुया
त् ततआचार्यः देशकालौ संकीर्त्यास्य ब्रह्मचारिणः वेदांतराध्ययनाधिकारार्थं यद्यानिषिद्धदे
शादिगमनप्रसूचितप्रत्यवायपरिहारार्थं पुनरुपनयनं करिष्य इति संकल्प्य स्थंडिलाद्यग्निप्र
तिष्ठांते त्रिरग्निं पवमानं प्रजापतिं चेत्येवमाज्यभागवर्ज्यमन्वाधानं कृत्वा आज्यसंस्कारांते बटोः
सूत्रेण कटावावध्य कौपीनं परिधाय युवं वस्त्राणीत्यनेनैकं वासः परिधाप्य तेनैव मंत्रेण द्वितीयं
प्रावारयेत् ततः यज्ञोपवीतमिति मंत्रेण यज्ञोपवीतं परिधाप्य कुमारमात्मनोऽग्नेश्च मध्येउद
कनीत्वा विधिराचम्य पुनस्तथैवानीयस्य दक्षिणत उपवेश्य बार्हिस्तरणाद्यारांते कृते अग्न अपं
पीत्यादिचोपस्थवकृत्वा कुमारमात्मनोऽग्नेश्च मध्येउदङ् दृष्ट्वा तस्यांजलिमुदकेनापूर्य स्वांजलिम
ध्येन्येन परायित्वा तस्य मनुरिति कुमारांजलावेव वक्षार्य देवस्यत्वेति हस्तं गृह्णाम्यमुकशर्मन्निति

62

इतिश्रीमद्दीक्षितमुकुंदलालस्यात्मजभडारूलालदीक्षितस्तत्सूनुदीक्षितशिवानंदविरचिते
उपनयनचिंतामणौपुनरुपनयनसंनिर्णयप्रयोगकथनंनामद्वितीयप्रकाशः २ समाप्तोऽयंग्रंथः
पोथीछपीसहरलखनऊमे बैजनाथकेछापेमेठिकानाकालिकाजीकेवजारमेबालकृष्णकेठाकुर
द्वारेमे संवत् १९०५ ज्येष्ठमासेशुक्लेपक्षेतिथौदशम्यांरविवासरान्वितम्॥ ॥शुभं॥ ॥ ॥

उपनयनचिंतामणि

63

आचार्यस्यपादावुपसंगृह्याधीहि भोःसावित्रीं भो अनुब्रूहीतिवदेत् अथाचार्यः प्रणवस्यपरब्रह्मऋ
षिःपरमात्मादेवता व्याहृतिमंत्रस्यप्रजापतिऋषिः प्रजापतिर्देवताव्याहृतिछंदः तत्सवितुःश्यावा
श्वःसवितानुष्टुपूउपदेशेवि॰ परछोदेवसाः तत्सवितुर्वृणीमहे इतिगायत्रीमुक्त्वा ममव्रतेप्रजापतिः
बृहस्पतीस्त्रिष्टुप् ममव्रतइतिमंत्रेणतद्धृदयेऽङ्गुलिंपाणिंनिदध्यात् नात्रमेखलादंडाजिन
भिक्षाः ततःस्विष्टकृदादिशेषसमाप्तिः ततःगोदानं बौधायनसूत्रेतु स्विष्टकृदादिशेषसमाप्तौअंते
पिपालाशींसमिधमाधायात्रास्यप्रायश्चित्तेजुहोति अथव्याहृतीर्जुहोति अथसावित्र्याशतकृत्वोघृत
मभिमंत्र्यप्राश्यकृतप्रायश्चित्तोभवति गुरोर्वाप्युच्छिष्टंभुंजीतेति ततःआचार्येणाभिषिक्तोकुमारः
स्वगृहमागत्ययथाविभसारेणआचार्यादिभ्योगोहेमवस्त्रादिनासंतोष्यअन्येभ्योब्राह्मणेभ्योदीना
नाथविशिष्टेभ्यश्चयथाशक्तिसंपाद्यब्राह्मणान्भोजयित्वाकर्मेश्वरार्पणंकृत्वापश्चात्सुहृद्युक्तोस्व
यंभुंजीतेति ब्राह्मणप्रातयेकारपुनःसंस्कारपद्धतिः प्रीतस्तुप्रीतिनःकुर्याच्छ्रीविष्णुरुरुक्रमः ८